# संस्कृतवार्ता:

**दिनाङ्क :-09.02.2025** **प्रात: - 06:55**

**अथ वार्ता:**

**दिल्ली – परिणाम**

भारतीय-जनता-पार्टी इति दलेन प्राय: त्रिदशकानन्तरं दिल्ली-विधान-सभा निर्वाचनेषु निर्णायकविजयोऽधिगत:, दलेन विद्यमान-आम-आदमी-पार्टी इति दलं पराजित्य बहुमताङ्क: प्राप्त:। सप्तति-विधानसभा-आसनेषु घोषित-परिणामेषु भाजपेति-दलेन अष्टचत्वारिंशत्-आसनानि विजितानि सन्ति अपि च आप इति दलेन द्वाविंशति-आसनानि विजितानि सन्ति। कांग्रेसाख्येन तृतीय-प्रतिस्पर्धि-दलेन एकमपि आसनं न विजितम्। भाजपेति दलीयेषु प्रमुख विजेतृषु- नव-दिल्लीत: प्रवेश साहिब-सिंह: रोहिणीत: विजेन्द्र-गुप्ता करावलनगरत: कपिलमिश्रादय: विजेतार: सन्ति।

---------------------------------------

**पीएम भाजपा सम्बोधन**

प्रधानमन्त्रिणा नरेन्द्रमोदिना दिल्ली विधानसभानिर्वाचने तद्-दलाय जनै: प्रदन्तस्य जनादेशाय जनताया: कृते कार्तज्ञता-भावं प्राकटयत्। प्रधानमन्त्रिणा सञ्चारतन्त्रे प्रदत्ते सन्देशे कथितं यत् एतस्य विशिष्टस्य ऐतिहासिक-जनादेशार्थं स: देहलीवास्तव्यानां जनानां समक्षे नतमस्तकोऽस्ति। श्रीमोदिना कथितं यत् भाजपेतिदलं कृतसङ्कल्पो वर्तते यत् देहल्यां जनहितार्थं देहल्या: विकासार्थं जनजीवने च समग्रगुणवत्ता-निधानार्थं विकसितभारतस्य च निर्माणार्थं देहल्या: प्रमुखभूमिकां सुनिश्चितुं ये ये संकल्पा:, दलेन स्वीकृता: तत्र कामपि अल्पतां न करिष्यति। अनेन सहैव प्रधानमन्त्रिणा दिल्ली-विधानसभा-निर्वाचने दलस्य विजयार्थं दलीयकार्यकतृभि: कृतप्रयासानाम् अपि अभिशंसनं कृतम्, मोदिना कथितं यत् दलीयकार्यकर्तृभि: कृतं पुरूषार्थं दृष्ट्वा स: गर्वान्वितो वर्तते ये प्रचण्डपुरूषार्थम् कुर्वन्तो दलं विजयं यावत् प्रापितवन्त:।

ह्यः राष्ट्रियराजधान्यां दलस्य मुख्यालये भाजपाकार्यकर्तॄन् सम्बोधयन् सः प्रोक्तवान् यत् अद्यत्वे देशः तुष्टीकरणस्य अपेक्षया सन्तुष्टेः नीतिं स्वीकुर्वन् अस्ति। सः प्रतिपादितवान् यत् सम्प्रति दिल्लीवासिनः भाजपेतिदलस्य सुशासनं द्रक्ष्यन्ति इति। प्रधानमन्त्रिणा आश्वासनं प्रदत्तं यत् भाजपादलस्य विजयानन्तरं दिल्लीनगरे अधुना विश्वस्तरीयनगरीयसंरचनानां निर्माणं भविष्यति।

---------------------------------------

**उत्तरप्रदेश:-मिल्कीपुर विधानसभा**

उत्तरप्रदेशस्य मिल्किपुर-विधानसभा क्षेत्रे भाजपेतिदलप्रत्याशी चन्द्रभानु-पासवान: समाजवादी-पार्टीतिदलस्य अजीत प्रसादं दशाधिक सप्तशतोत्तरैक षष्टि: मतै: पराजित्य उपनिर्वाचनं विजितवान्। अवधेयं वर्तते यत् मिल्कीपुरस्य विधानसभासनं सपा-दलस्य नेत्रा अवधेशप्रसादेन फैजाबाद त: चतुर्विंशत्यधिक द्विसहस्रतमस्य लोकसभा-निर्वाचने प्राप्तविजयानन्तरं रिक्तं जातम्।

---------------------------------------------

**क्रिकेट- द्वितीयः एकदिवसीयः -**

पुरुषक्रिकेट्-क्रीडायां अद्य अपराह्ने कटक-नगरस्य बाराबती-क्रीडाङ्गणे तिसृणां-क्रीडानां एकदिवसीय-श्रृङ्खलाया: द्वितीये द्वन्द्वे भारतम् अद्य इङ्ग्लैण्ड्-दलं सम्मुखीकरिष्यति। क्रीडायाः प्रसारणं मध्याह्ने सार्धैक वदने भविष्यति।

---------------------------------------------

**संस्कृत-साप्ताहिकी**

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: अद्य मध्याने सार्धैक-वादनत:भविष्यति। कृपया श्रृण्वन्तु।

**।। इति वार्ता:।।**